International Journal of Sanskrit Research 2021; 7(1): 84-88

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 84-88
© 2021 IJSR
www.anantaajournal.com
Received: 10-11-2020
Accepted: 19-12-2020

**संगीता राणी विश्वालः**
शोधच्छात्रा, सम्बलपुर-विश्वविद्यालये,
सम्बलपुरम्, ओडिशा, भारत

**Corresponding Author:**
**संगीता राणी विश्वालः**
शोधच्छात्रा, सम्बलपुर-विश्वविद्यालये,
सम्बलपुरम्, ओडिशा, भारत

# कवि-गणेश्वर-रथस्य काव्येषु छन्दोवैविध्य-विवेचना

## संगीता राणी विश्वालः

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i1b.1276

**सारांशः**

समग्र-संस्कृत-साहित्यवाङ्मये यस्य कवेः कालजयविजयवैजयन्ती सगर्वमुन्ड्यमाना दृश्यते, सः भवति दीपशीखाकविः वाचस्पति-गणेश्वर-रथ-महोदयः। सः उत्कलीय-सारस्वतसाधकः कविवरः अनेक-काव्यकृतिभिः संस्कृतसाहित्यस्य कीर्त्तिध्वजामग्रे सारयति। संस्कृतवाङ्मये तस्य काव्यानि स्वतन्त्रतामर्हन्ति। कवेः उच्च-कोटिकं कवित्वं नूनं स्वीकरणीयम्। तस्य शास्त्र-नैपुण्यं पाण्डित्यं च सहृदय-जनानां श्रद्धाभाजनम्। भारतीय-संस्कृत्याः पृष्ठपोषक-रूपेण कवेः सारस्वतमवदानं अविस्मरणीयमेव। कविना स्वरचितेषु काव्येषु वहुविधैः छन्दोभिः रचिनानि श्लोकानि सन्निवेशितानि। यथा - मन्दाक्रान्ता, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, वंशस्थः, स्रग्धरा, वसन्ततिलक, शिखरिणि, भूजंगप्रयातमादयः। एतेषां छन्दसां लक्षणं-उदाहरणैः सह मया केचन अत्र शोधप्रवन्धेऽस्मिन् उपस्थाप्यते।

**कुटशब्द:** छन्दोवैविध्य-विवेचना, वाचस्पति-गणेश्वर-रथ-महोदयः, समग्र-संस्कृत-साहित्यवाङ्मये

**प्रस्तावना:**

संस्कृतसाहित्यजगति काव्यस्य विशिष्टस्थानं वर्त्तते। संसारेऽस्मिन् शारीरिक-मानसिक-क्लेशयुक्तस्य तापत्रयपीडितस्य मनुष्यस्य मनशान्त्यर्थं, मनोरञ्जनार्थं, मनसः परमानन्दप्राप्त्यर्थं च काव्यस्य उत्पत्तिः। काव्यनिर्माणक्षेत्रे कविः अलौकिकः पुरुषः, तस्य रचना चालौकिकी सृष्टिः। प्रजापतिः सर्वशक्तिमान्, सकलसृष्टेः प्रणेता च। तस्य व्रह्मणः त्रिगुणात्मिका-सत्वरजोतमोरूपा- सुखदुःखमोहात्मिका सृष्टिः अपेक्षया इयं कविसृष्टिः उत्कृष्टा विलक्षणा च भवति। अस्मिन् काव्यविषये अग्निपुराणाकारेण व्यासदेवेन उक्तम्-

"अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्ते रोचते विश्वं तदेव परिवर्त्तते॥" [१]

अर्थात् कविः प्रजापतिरस्ति, सः स्वरूच्यनुसारं काव्यसंसारं निर्माति। कविः यत् वर्णयति रचयति तत् काव्यम्। रस-अलङ्कार-छन्द-गुण-रीत्यादयः काव्यस्य शोभां वर्द्धयन्ति। आधुनिकसंस्कृतसाहित्यस्य कविः गणेश्वर-रथ-महोदयः तस्य काव्यकृतिषु विविधछन्दसां प्रयोगं कृतवान्। तेषु केचन-छन्दसां लक्षण-उदाहरणैः सह अस्मिन् प्रस्तुतेलेखे विचारयामः।

उत्कलीय-सारस्वतसाधकः कविवरो गणेश्वरः रथः अनेक-काव्यकृतिभिः संस्कृत-साहित्यस्य कीर्तिध्वजामग्रे सारयति। संस्कृत-साहित्ये तस्य काव्यानि स्वतन्त्रतामर्हन्ति। उत्कल-महाराजस्य श्रीपुरुषोत्तमदेवस्य काञ्चीदेश-विजयं, काञ्ची-राजकन्यया पद्मावत्या सह परिणयं च आधारीकृत्य कविः 'पुरुषोत्तमचरितम्' इति महाकाव्यं प्रणीतवान्। अस्मिन् विषये काव्यस्य मौलिकत्वं विद्यते। अत्र पुनः महाप्रभु-श्रीजगन्नाथ-वलभद्र-देवयोः लौकिक-वर्णनं श्रीक्षेत्र-पुरी-नगर्याः विशेषत्वं गौरवं च प्रतिपादयति। कविना 'लिङ्गराजायनम्' इति काव्यं भगवतः महादेवस्य लिङ्गराज-महाप्रभोः चरितमाधारिकृत्य विरचितम्। शक्तिस्वरुपिण्याः दुर्गादेव्याः महिमानमाधारीकृत्य 'शक्तिशतकम्' तथा 'शक्ति-महिम्नस्तवः' इति काव्ययुग्मं प्रणीतम्। 'सकलेश्वर-शतकम्' अपि भगवतः शिवस्य गौरवं प्रख्यापयति। उत्कल-देशस्य गौरवमयमैतिह्यम्, हरि-हर-देवयोः माहात्म्यम्, आध्यात्मिकतायाः जनजीवनोपरि-प्रभावः चेत्यादिकं विषयजातं कवेः वैशिष्ट्यं परिचाययति।

अतः अनन्य-रचना-रुपेण कवेः संस्कृत-कृतयः नव्य-दिशां दर्शयन्ति।

**छन्दोवैविध्य-विवेचना:**

अखिल-भूमण्डलेऽस्मिन् समुपलब्धेषु विविधभाषागत-प्राचीनग्रन्थेषु वेदः प्राचीनतमः ग्रन्थः भवति। सकलधर्माणां मूलरूपः अयं वेदः साधारणजनानां कृते दुर्बोध्यः दुरुहश्च। अतः एतस्य वेदस्य सम्यग्रुपेण यथार्थज्ञान-अववोधनाय शिक्षादिषट्वेदाङ्गशास्त्राणां सहायता प्रयोजनञ्च विद्यते। यथा अङ्गानि विविधरूपेण स्वाङ्गीनां सहयोगं संरक्षणं च कुर्वन्ति, तथैव वेदाङ्गानि अपि वेदमन्त्राणां विविधरूपेण अनेक-उपकारं कुर्वन्ति। एतेषां वेदमन्त्राणां सुरक्षार्थं वेदाङ्गानां ज्ञानमावश्यकं प्रतिभातीति। वेदपुरुषस्य एतान्येव वेदाङ्गानि, तेषु छन्दः पञ्चममङ्गमस्ति। महर्षि-पाणिनिना शिक्षाशास्त्रे प्रामुख्यमुक्तम् –

" छन्दः पादौतु वेदस्य, हस्तौ कल्पोऽथपठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य, मुखं व्याकरणं स्मृतम।
तस्मात् सङ्गमधीत्यैव, व्रह्मलोके महीयते॥" [२]

इत्यनेन 'छन्दः' वेदपुरुषस्य पादः इति उक्तम्। यथाहि पादाभ्यामेव शरीरिणो गतिर्भवति तथैव पादरुपेण छन्दसा मन्त्रात्मक-वेदस्वरुपस्य अवगतिः प्रगतिश्च भवति। कविता प्राणसङ्गीतम्, छन्दः तु सकलप्राणीनां हृत्कम्पनं भवति। छन्दः लयमर्यादित-रुपम्। छन्दः आवेगवाहकम्। छन्दः चित्रानुभवम् भवति येन अनायासेन अनेकेषु चित्तेषु सञ्चारयति। छन्दः काव्यसौन्दर्यबर्द्धक-तत्वं भवति। काव्ये मोहकता-रमणीयता-अभिव्यक्तितीव्रता-आह्लादकता-सम्पादनाय छन्दसः भूमिका गुरुत्वपूर्णा वर्तते।

छद्यते इति छन्दः। `च्छन्दस्' शब्दः नपुंसकलिङ्गः। 'छन्द्' धातोः चुरादिगणे 'घञ्' प्रत्यये आह्लादनार्थे, छादनार्थे च "छन्दः" इति शब्दः निष्पद्यते। "छन्दांसि छादनात्।" [३] इति निरुक्तारवचनानुसारं येन भावरसादयः आच्छादिताः भवन्ति तच्छन्दः। अथवा 'च्छदि' इत्यस्मात् धातोः "छादेपाहरछः" इत्यनेन पाणिनिसुत्रेण 'असून्' प्रत्यये 'छन्दः' इति शब्दः निष्पद्यते। छन्दसः प्रयोग-विषये भरतमुनिना स्वकीये नाट्यशास्त्रे अभिव्यक्तम् इत्थम् –

" लघ्वाक्षरत्रासकृतमुपमारुपकाश्रयम्।
कार्याकार्यान्तिनारसैः विररुद्राद्भुताश्रम्॥
गुर्वक्षरप्रायकृतं विभत्सकरणे तथा।
कदाचिद्वीररुद्राभ्यां यदा च धर्षणं भवेत॥" [४]

छन्दज्ञानाय प्रथमतया लघुगुरुमात्राद्वयस्य आवश्यकता वर्तते। यथा –

"सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः।
वा पदान्ते त्वसौ वक्रौ ज्ञेयोऽन्यो मत्रिका लघुः॥" [५]

अर्थात् अनुस्वारः, विसर्गयुक्तः, दीर्घः, संयुत्काक्षरस्य पुरतश्च गुरुर्भवति तदन्यः लघुश्च। द्विमात्रिका गुरुः, एकमात्रिका लघुश्च भवति। लघुः "।" इति चिह्निकः, तथा गुरुः "ऽ" इति चिह्निकश्च भवति। यद्यपि लघुगुरुमात्राद्वयं ज्ञातुं शक्यते, तदानिमेव छन्दसां ज्ञानं न भवति। इतोऽपि छन्दसां कृते गणानाम् आवश्यकता अपेक्षते। छन्दशास्त्रे अष्टौ गणाः सन्ति। यथा - मगणः, यगणः, रगणः, तगणः, जगणः, भगणः, नगणः, इति अष्टौ गणाः सन्ति। तेषां लक्षणं यथा -

"आदिर्मध्यवसानेऽपि भजसा यान्ति गौरवम्।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम्॥" [६]

अपिच-

मस्त्रीगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः क्वितोऽन्तलघुश्च॥ [७]

**कवि-गणेश्वर-रथस्य काव्येषु छन्दोवैविध्यम्:**

संस्कृतकाव्यमन्दाकिनी माधुर्यमयी, सौन्दर्यमयी, विविधतामयी च सती सततं सहृदयानां हृदयानि मोहयति। कवेः गणेश्वर-रथ- महोदयस्य काव्यानि संस्कृतसाहित्ये स्वतन्त्रतामर्हन्ति। तस्य काव्येषु विविध-पारम्परिक-छन्दसां प्रयोगः परिलक्ष्यते। यथा - इन्द्रव्रजा, उपेन्द्रव्रजा, उपजातिः, मन्दाक्रान्ता, वंशस्थः, स्त्रग्धरा, भूजङ्गप्रयातः, वसन्ततिलकः, शिखरिणी, मालिनी चेत्यादीनि छन्दांसि प्रयुक्तानि दृश्यन्ते।

**इन्द्रवज्रा:**

यस्मिन् पद्ये प्रथम-द्वितीय-तृतीय-चतुर्थाक्षरं गुरु तथा तृतीय-षष्ठ-सप्तम-नवमाक्षरं च लघुः भवन्ति, अन्ते च गुरुवर्णद्वयं भवन्ति, तत्र इन्द्रवज्राच्छन्दः भवति। अस्मिन् छन्दसि क्रमशः तगणः(।ऽऽ), तगणः (।ऽऽ), जगणः(।ऽ।), अन्ते च गुरुवर्णद्वयं (ऽऽ) भवन्ति, एवं पञ्चमे षष्ठे च यतिर्भवति। श्रुतवोधे यथा-

" यस्यां त्रिषट्सप्तममक्षरं स्याद्
ह्रस्वं तु वृत्ते नवमं च तद्वत्।
मत्या विलज्जीकृतवाक्पते हे !
तमिन्द्रव्रज्रां ब्रुवते कवीन्द्राः॥" [८]

**अपिच-**

" स्यादिन्द्रवज्रा यदि तौ जगौ गः॥" [९]

कवेः वाचस्पति-महोदयस्य 'पुरुषोत्तमचरितम्' इति काव्यस्य पञ्चम-सर्गे प्रभोः श्रीजगन्नाथस्य माहात्म्य-वर्णनावसरे कविना इन्द्रवज्रा-छन्दसः प्रयोगः कृतः। यथा –

" पतित्यदावं पुरतः प्रणम्य
प्रदक्षिणाध्वस्थितदेवदेवी।
लोकालयं ज्वलितदीपजालं
दीप्त्या विभोर्दीप्ततरं समन्तात्॥" [१०]

अत्र प्रतिपदं क्रमानुसारं तगणद्वयम्, जगणः, एवं अन्तिमे गुरुबर्णद्वयं च भवन्ति। अतः इन्द्रवज्रा छन्दः इति स्वीक्रियते।

**२) उपेन्द्रवज्राः**

"उपेन्द्रवज्रा प्रथमे लघौ स्यात्" इति। [११] अर्थात् इन्द्रवज्रा-छन्दसः ये गणाः भवन्ति, तत्र च प्रत्येके पादे यानि अक्षराणि सन्ति अत्रापि तानि अक्षराणि भवन्ति, केवलं पादस्यारम्भे प्रथमम् अक्षरं लघुः भवति चेत् तत्र उपेन्द्रवज्रा-छन्दः भवति। अत्र गणाः क्रमशः ज (।ऽ।), त (ऽऽ।), ज

(।ऽ।) भवन्ति, अन्ते च गुरुद्वयं (ऽऽ) तिष्ठतः। अत्रापि इन्द्रबज्रावत् पञ्चमे षष्ठे च यतिः भवति। तदुक्तं श्रुतवोधे-

" यदीन्द्रवज्राचरणेषु पूर्वे
भवन्ति वर्णाः लघवः कदाचित्।
कुशाग्रवत् तीक्ष्णमते! तदानीम्
उपेन्द्रवज्रा कथिता कवीन्दैः॥" [१२]

'श्रीपुरुषोत्तमचरितम्' इति महाकाव्यस्य दशम-सर्गे उत्कलनरेश्वर-काञ्चीनरेश्वरयोः मध्ये युद्धवर्णनावसरे कविः उपेन्द्रवज्रा- छन्दसः प्रयोगः कृतवान्।

" क्रमेण गत्वा सगणो नरेशः
स्वराज्यमध्ये प्रविशत्तदुग्रम्।
सुरक्षितं राजवरैः परस्य
समैक्षताम्मोनिधिकल्पसैन्यम्॥" [१३]

उदाहरणेस्मिन् प्रत्येकपदे क्रमशः जगणः, तगणः, जगणः भवन्ति, शेषे च गुरुद्वयं स्तः। एवं इन्द्रवज्रावत् पञ्चमे षष्ठे च यतिः भवति। अतः अत्र उपेन्द्रवज्रा छन्दः स्वीक्रियते। एवमन्यत्र अपि कवेः काव्येषु दृश्यन्ते।

### ३. उपजातिः

यत्र इन्द्रवज्रा-उपेन्द्रवज्राछन्दयोः मिश्रणं भवति, तत्र उपजातिर्नाम छन्दः स्वीक्रियते। उपेन्द्रवज्रायाः गणास्तु भवन्ति-जगणः, तगणः, जगणः, शेषे गुरुवर्णद्वयम्। इन्द्रवज्रायाः गणाश्च भवन्ति - तगणः, तगणः, जगणः, अन्तिमे गुरुवर्णद्वयम् च। अत्र प्रतिचरणं २२ अक्षराणि सन्ति। यथोक्तं श्रुतवोधे –

" यत्र द्वयोरप्यनयोस्तु पादा
भवन्ति सीमन्तिनि! चन्द्रकान्ते।
विद्वद्भिराद्यैः परिकीर्त्तिता सा
प्रयुज्यतामित्युपजातिरेषा॥" [१४]

**पुनश्च-**

"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।
इथं किलान्यास्वपि मिश्रितासु बदन्ति जातिष्विदमेव।" [१५]

वाचस्पतिः गणेश्वर-महोदयः श्रीपुरुषोत्तमचरितम्-महाकाव्यस्य अष्टम-सर्गे राजा पुरुषोत्तस्य गुणवर्णनावसरे उपजाति छन्दसः प्रयोगं कृतवान्। यथा-

"वाग्देवताधिष्ठितकण्ठधामा
लोकप्रियः शासनकर्मदक्षः।
सुरद्रुमो याचकमण्डलीनां
पृष्ठं सदा रक्षतु भूमिपालः॥" [१६]

एवं अस्मिन् उदाहरणे प्रथम-द्वितीय-चतुर्थचरणेषु उपेन्द्रवज्रा, तृतीयचरणे च इन्द्रवज्रा विद्यते। अतः उभयोः मिश्रणात् श्लोकोऽयमुपजातिछन्दसा रचितम् इति ज्ञायते। कवेः अन्येषु काव्येषु एतादृशानि वहुनि पद्यानि वर्त्तन्ते।

### ४. मन्दाक्रान्ताः

"मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्।" [१७] अर्थात् यस्मिन् पद्ये प्रथमचत्वारि अक्षराणि तथा अनन्तरं दशम-एकादश- त्रयोदश-चतुर्दश-षोडशं-सप्तदश-अक्षराणि गुरुणि भवन्ति तत्र मन्दाक्रान्ता छन्दः भवति। अस्मिन् छन्दसि क्रमशः मगणः, भगणः, नगणः, तगणौ द्वौ च भवन्ति तथा अन्तिमौ द्वो वर्णौ गुरु-भवतः। एवं चतुः षटसप्तमाक्षरेषु यतिर्भवति। यथोक्तं-

" चत्वारः प्राक् सुतनु! गुरवो द्वौ दशैकादशौ चे-
न्मुग्धे! वर्णौ तदनु कुमुदामोदिनि! द्वादशान्त्यौ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते! विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि! तां सङ्गिरन्ते॥" [१८]

'श्रीपुरुषोत्रमचरिम्' इति महाकाव्यस्य अन्तिमे सर्गे कल्पद्रूमसदृशं जगन्नाथं प्रणम्य काञ्चिश्वरः स्वकन्या-पद्मावतीं उत्कलेश्वराय दातुं चिन्तयति। अत्र कविना मन्दाक्रान्ता-छन्दसः प्रयोगं क्रीयते। यथा -

" नत्वा पूर्वं व्रजपुरवधूमानरक्षानिदानं
विश्वाधारं त्रिभुवनपतिं भक्तकल्पद्रुकल्पम्।
सिंहद्वारि स्वजननिवहैः संसदं कारयित्वा
तत्रासीनः प्रकृतिनिवहं धीरगम्भीरमाह॥" [१९]

अपर्युक्ते पद्ये क्रमशः मगण-भगण-नगण-तगण-तगणानां प्रयोगं भवन्ति, तथा अन्तिमबर्णद्वयं गुरु भवतः।

### ५ - वंशस्थः

वंशस्थं समवृत्तेषु एकम्। अत्र प्रत्येकं चरणे द्वादशाक्षराणि सन्ति। अस्य लक्षणं यथा –

"जतौ तु वंशस्थमुदीरितौ जरौ।" [२०]

यथा वा-

"वदन्ति वंशस्थविलं जतौ जरौ" [२१]

अर्थात् अस्य छन्दसः प्रतिचरणं क्रमशः जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), रगणः (ऽ।ऽ) च भवन्ति।
'श्रीपुरुषोत्तमचरितम्' इति महाकाव्यस्य षष्ठ-सर्गे कविः वाचस्पतिः जगदीश्वर-जगन्नाथस्य महिमानं प्रकाशयन् एवमेव व्यनक्तिः

" निवेशितो राजवरेण मानितः
स मन्त्रिवर्य्यः परितुष्टमानसः।
स्वराजदत्तं प्रददौ सगौरवं
समुद्रितं पत्रमरिन्दमाय तत्॥" [२२]

पुनश्च सर्गेऽस्मिन् पद्मावती-पुरुषोत्तमयोः विवाह-सम्बन्धः स्थिरिकर्त्तुं काञ्चिनरेश्वरः उत्कलेशाय सुमुद्रितं पत्रं दत्तवान्। यथा-

" दयैव सा किं कटिनद्रवाससा
समाचकर्ष प्रभाविष्णुमोजसा।
अतो विहाय स्वपदं दयामयः
प्रसार्य्य वाहु समुपागतो वहिः॥" [२३]

उभयोः उदाहरण-श्लोकयोः चतुर्षु चरणेषु क्रमशः जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), रगणः (ऽ।ऽ) च भवन्ति। उतोऽत्र वंशस्थछन्दः अङ्गीक्रियते।

**६ - भूजङ्गप्रयातः**

यत्र प्रथम-चतुर्थ- सप्तम-एकादशाक्षराणि ह्रस्वानि, तथा अन्यानि दीर्घानि च भवन्ति तत्र भूजङ्गप्रयातः छन्दो भवति। श्रुतवोधे यथा-

" यदाद्यं चतुर्थं तथा सप्तमं चेत्
तथैवाक्षरं ह्रस्वमेकादशाद्यम्।
शरच्चन्द्रविद्वेषिवक्रारविन्दे !
तदुक्तं कवीन्द्रै भूजङ्गप्रयातम्॥" २४

**यथा वा-**

"भूजङ्गप्रयातं चतुर्भिर्यकारैः" २५

अर्थात् अस्य छन्दसः प्रत्येकं चरणं क्रमशः यकारैः युक्तं भवन्ति। 'लिङ्गराजायनम्' इति खण्डकाव्यस्य ज्ञान-काण्डे वर्णिताः विषयाः किंम्बदन्त्याः उपरि समाश्रिताः। तत्र कविः विन्दुसरोवरस्य अवस्थिर्ति विषये भूजङ्गप्रयातछन्दसा कृतवान्। यथा –

" विचित्रं शिवाराधितं चित्रमास्ते
सरो याम्यदेशे प्रसुत्पाम्बिकायाः।
तदद्यापि विज्ञापयत्येव लोका-
नतीतं पुरोगं प्रभावं च तस्याः॥" २६

पद्येऽस्मिन् भूजङ्गप्रयातछन्दसः लक्षणानुसारं प्रथम-चतुर्थ-सप्तमैकादशाक्षराणि ह्रस्वानि; तथा अन्यानि दीर्घानि भवन्ति, प्रत्येकं चरणं क्रमशः यकारैः युक्तं भवति।

**७ - वसन्ततिलका :**

यत्र आद्यम्, द्वितीयम्, चतुर्थम्, अष्टमम्, एकादशम्, त्रयोदशम्, चतुर्दशं चाक्षरं गुरु अन्ये च वर्णाः लघवः भवन्ति, तत्र वसन्ततिलका-छन्दो भवति। यथोक्तं श्रुतवोधे –

" आद्यं द्वितीयमपि चेद् गुरु तच्चतुर्थं
यत्राष्टमं च दशामान्त्यमुपन्त्यमन्त्यम्।
कामाङ्कुशितकामिमतङ्गजेन्द्र !
कान्ते! वसन्ततिलकां किल तां वदन्ति॥" २७

**यथा वा –**

"ज्ञेयं वसन्ततिलकं तभजा जगौ गः।" २८

अर्थात् अस्य छन्दसः प्रत्येकचरणे तगणभगणौ, जगणद्वयं, गुरुद्वयञ्च सन्ति। कविना 'श्रीसकलेश्वरशतकम्' इति काव्ये महादेवस्य सकलेश्वरस्य अमित-माहात्म्यं प्रतिपादनावसरे वसन्ततिलकाछन्दसः प्रयोगं क्रीयते। यथा –

" श्रुत्वा जनास्तदुदितं सकलेश्वरीयं
महात्म्यमेव जगदुर्जगुरस्य नाम।
तेनैव साकमगमन्निजवेश्म दीनान्
आत्मीयवान्धवगणान् परिनन्दयन्तः॥" २९

अस्मिन् पद्ये लक्षणानुसारं क्रमशः तगण-भगण-जगण-जगणः एवं शेषे गुरुद्वयमस्ति। अतोऽत्र वसन्ततिलका-छन्दः भवति।

**८ - स्रग्धरा**

यत्र आद्याः चत्वारः वर्णाः गुरवः, पञ्चमवर्णः लघुः, षष्ठकः सप्तमश्च गुरु, अष्टमाक्षरात् त्रयोदशाक्षरं यावत् तथा षोडश-ऊनविशांक्षरे च लघूनि, चतुर्दश-पञ्चदश-सप्तदश-अष्टादश-विंशति-एकविंशत्यक्षराणि च गुरुणि भवन्ति तत्र स्रग्धराछन्दः अङ्गीक्रियते। अत्र सप्तसु सप्तषु अक्षरेषु यतिः भवति। यथोक्तं श्रुतवोधे-

" चत्वारो यत्र वर्णाः प्रथमलघवः षष्ठकः सप्तमोऽपि
द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते! षोडशान्त्यौ तथाडन्त्यौ।
सम्भास्तम्भोरुकान्ते! मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो
बाले! वन्धैः कवीन्द्रैः सुतनुनिगदिता स्रग्धरा सा प्रसिद्धा।।" ३०

एवं च-

"म्रभ्नैर्यानां त्रयेण् त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् " ३१

अर्थात् अस्य छन्दसः प्रत्येक-चरणे क्रमशः मगण-रगण-भगण-नगण-त्रययगणाः भवन्ति। 'शक्तिशतकम्' इति काव्ये कविः रथ-महोदयः शक्तिस्वरूपिण्याः दुर्गादेव्याः विश्वरूपत्वं निज-हृदय-पद्मे सदैव समुद्भासितं भवतु तथा दुःखमय-संसारे पुनर्जन्मः न भवतु इति निवेदयति। अस्मिन् अवसरे अस्य छन्दसः उदाहरणमेकम्-

" नाहं जाने ततस्त्वं भगवति सदयाभीष्टभावं प्रदेहि
संसारे दुःखघोरे पुनरपि महि मे जन्म भूयात् कदाचि-
त्वत्सेवानौकयास्मिन् जतुषि भवमहाम्भोधिपारं नयस्व
मित्रामित्रेष्वजस्रं मनसि निवसतात् साम्यभावोऽनपायी॥" ३२

पद्येऽस्मिन् आद्याः चत्वारः वर्णाः गुरवः, पञ्चमवर्णः लघुः, षष्ठकः सप्तमश्च गुरुः, अष्टमाक्षरात् त्रयोदशाक्षरं यावत् तथा षोडश-ऊनविशांक्षरे च लघूनि, चतुर्दश-पञ्चदश-सप्तदश-अष्टादश-विंशति-एकविंशत्यक्षराणि च गुरुणि भवन्ति तथा प्रतिचरणेषु क्रमेण मगण-रगण-भगण-नगणः भवन्ति। अतः अत्र स्रग्धरा-छन्दः भवति।

**९ - शिखरिणी:**

यस्मिन् छन्दसि प्रत्येकचरणे प्रथम-सप्तम-अष्टम-नवम-दशम-एकादश-चतुर्दश-पञ्चदश-षोडश-वर्णाश्च लघवो भवन्ति, पुनश्च षष्ठे एकादशे च विरामो भवति, तत् शिखरिणीछन्दः इत्युच्यते। यथोक्तं –

" यदा पुर्वो ह्रस्वः कमलनयने! षष्ठकपरा
स्ततो वर्णाः पञ्चप्रकृतिसुकुमाराङ्गि! लघवः।
त्रयोऽन्ये चोपान्त्याः सुकविजनतासौख्यकरणी
रसै रुद्रै र्यस्यां भवति विरतिः सा शिखरिणी॥" ३३

अपि च-

"रसै रुद्रैरिद्यात्रा यमनसभला गः शिखरिणी।" ३४

अर्थात् अस्य छन्दसः प्रत्येकचरणे क्रमशः यगण-मगण-नगण-समण-भगणाः सन्ति। अन्तिमे बर्णद्वये एकः लघु एकः गुरु च भवतः।
'शक्तिमहिम्नस्तवे' कविः वाचस्पतिः चैतन्य-रूपिण्याः शक्तिदेव्याः विश्वरूपत्वं वर्णनावसरे अस्य छन्दसः उदाहरणमेकं यथा –

" विराडाद्योपाधिप्रथितबिभबाः पद्मजमुखा
गुणैर्व्यस्तैर्युक्तास्त्रिभरभहतैर्यस्य तनवः।
गुणानां साम्यं या प्रकृतिरनया युक्तममलं
तुरीयं यद्ब्रह्मेत्यभिहितमिदं सा भगवती॥" [३५]

श्लोकेस्मिन् प्रत्येकचरणे क्रमशः यगणः (।ऽऽ), मगणः (ऽऽऽ), नगणः (।।।), सगणः (।।ऽ), भगणः (ऽ।।), लघु (।) गुरु (ऽ) सन्ति। तथा षष्ठैकादशाक्षरैश्च यतिर्भवति। अतः शिखरिणीछन्दः स्वीक्रियते।

**उपसंहारः**

उपयुक्तरूपेण लालित्य-माधुर्यमयपद-माध्यमेन स्वकीय-सारस्वतकृतिषु एवं विविधछन्दसां प्रयोगं कृत्वा कविः गणेश्वर-रथ-महोदयः स्वीयछन्दोगतपाण्डित्यं प्रदर्शयति। सरलभाषया तस्य रचितेषु ग्रन्थेषु एते सर्वेऽपि श्लोकाः अतीवरमणीयाः प्रतिभान्ति।

**सन्दर्भाः**

1. अग्निपुरणः -४/३३७
2. पाणिनीयशिक्षा- ४१,४२
3. निरुक्ते - ७/३
4. नाट्यशास्त्रः -१७/११४-११५
5. वृत्तरत्नाकरः. -१/१
6. श्रुतबोधः-३
7. छन्दोमञ्जरी-१/८
8. श्रुतवोध - १२१
9. छन्दोमञ्जरी - २/२१/१
10. श्रीपुरुषोत्तमचरितम् - ५/५२
11. छन्दोमञ्अरी-२/११/२
12. श्रुतवोधः - २२
13. श्रीपुरुषोत्तमचरितम् - १०/६५
14. श्रुतवोधः - २३
15. छन्दोमञ्जरी-२/११/३
16. श्रीपुरुषोत्तमचरितम - ८/१९
17. छन्दोमञ्जरी-२/१७/४
18. श्रुतवोध - १८
19. श्रीपुरुषोत्तमचरितम - १२/५५
20. पिङ्गलसुत्रम् - ६/२८
21. छन्दोमञ्जरी - २.१२.२)
22. पुरुषोत्तमचरितम - ६/११
23. श्रीपुरुषोत्तमचरितम - ६/२३
24. श्रुतवोध - २८
25. छन्दम्ञ्जरि -२/१२/५
26. लिङ्गराजायनम् - १/१५
27. श्रुतवोध - ३६
28. छन्दोमञ्जरी -२/१४/२
29. श्रीसकलेश्वरशतकम् - ६६
30. श्रुतवोध - ४३
31. छान्दोमञ्जरी - २.२१.१
32. शक्तिशतकम् - ९९
33. श्रुतवोध - ४०
34. छन्दोमञ्जरी - २/२७/९
35. शक्तिमहिमस्तवः - २८

**सहायक-ग्रन्थादीनां सूची:**


1. श्रीपुरुषोत्तम-चरितम्(गणेश्वर-रथ-वाचस्पतिः)
   ओडिशा साहित्य अकादेमी,भूवनेश्वर,ओडिशा,१९७०
2. लिङ्गराजायनम् (गणेश्वर-रथ-वाचस्पतिः)
   ओडिशा साहित्य अकादेमी,भूवनेश्वर,ओडिशा,१९७०
3. श्रीसकलेश्वरशतकम्
   (लेखकः प्रकाशकश्च : गणेश्वर-रथ-वाचस्पतिः)
   स्वाधीन-प्रेस् ब्रह्मपुरे मुद्रितम्।
4. चण्डीविधान-पद्धतिः
   (शाक्तिशतकम्, शक्तिमहिम्नः स्तवः इति काव्ययुग्ममत्र अन्तर्गतम्)
   लेखकः प्रकाशकश्च : गणेश्वर-रथ-वाचस्पतिः
   अरुण-प्रिन्टिङ्ग् वार्क्स् ब्रह्मपुरे मुद्रितम्।
5. छन्दशास्तम्-आचार्यपिङ्गल
   परिमलपब्लिकासन्, दिल्ली, २००७
6. नाट्यशास्त्रम्-भरतमुनिः
   भारतीय-विद्याप्रकाशन, दिल्ली- २००३
7. साहित्यदर्पणः, संपादकः- आचार्य कृष्णमोहन शास्त्री,
   चौखम्बा संस्कृत संस्थान, वाराणासी, १९९६